हैमप्रभा- अङ्क : २०, २०७८ पृ. ९७-१०४ ISSN : 2392-4764 (P)

# व्याकरणशास्त्रस्योत्पत्तिर्विकासश्च

सरस्वती पोखेल (विद्यावारिधि)
सहप्राध्यापकः, व्याकरणविभागः
नेसंवि, जनताविद्यापीठम्, बिजौरी, दाङः, नेपालः
Email:saraswatipokhrel2@gmail.com

(**सारसंक्षेपः** *अस्मिन्नालेखे संस्कृतभाषा विश्वस्यैवादिमा भाषा वर्तते अथवा अस्या अपि संस्कृतभाषाया जननीरूपेण निर्दिश्यमाना अन्या भाषा वर्तत इति विश्लेषणपुरःसरमस्या गीर्वाणवाण्या उत्पत्तिविषयसम्बद्धा चर्चा कृताऽस्ति । तदनु संस्कृतजगति व्याकरणस्य परम्परा कया रीत्याऽवतरति । आद्यावधिको व्याकरणस्य विकासक्रमः कीदृशो निर्दिश्यत इति विषयमादाय व्याकरणग्रन्थानां वैयाकरणानाञ्चाधिक्ये विद्यमानेऽपि पाणिनीयस्यैव व्याकरणस्याऽध्ययनाऽध्यापने को हेतुरिति वक्ष्यते। तदनु पाणिनीयस्य व्याकरणस्योत्पत्तिविषयः सर्वथा मौलिकः स्वतः स्फूर्तो वा, उत व्याकरणात् पाणिनीयादग्रेऽप्यासन् वैयाकरणास्तेषां ग्रन्थाश्चेतिविविच्य यदि ग्रन्था आसन् तर्हि तेषां प्राग्वर्तिव्याकरणग्रन्थानां वैयाकरणानाञ्च प्रभावः पाणिनीये व्याकरणे कया रीत्या समुदेतीति ज्ञाप्यते । ज्ञापनसन्दर्भेस्मिन् पाणिनीये व्याकरणे ससूत्रं निर्दिश्यमानाः सर्वेप्याचार्या वैयाकरणा एवासन्नुत कतिपयानामाचार्याणामभिमतान्येवोपात्तानि पाणिनिनेति विषयोऽयमुद्घाटितो विद्यते । तदनु केन कारणेन पाणिनीयस्यैव व्याकरणस्य महदवदानं सिध्यतीति विषयमादाय पाणिनीयस्य ग्रन्थस्य तस्य नाम किमस्ति । नाम्नः सार्थकता वर्तते अथवा नेति विविच्यते । यदि पाणिनीयो ग्रन्थ एव पूर्णतामावहति तर्हि व्याख्यानरूपेणावतीर्णानां पाणिनिग्रन्थमुपजीव्योपनिबद्धानां ग्रन्थान्ताराणामावश्यकता सिध्यति अथवा न सिध्यति, यदि सिध्यति तर्हि कथं सिध्यतीत्युपस्थाप्य नातिविशदचर्चया व्याख्याग्रन्थकृतां नाम्नामुपस्थापनेन व्याकरणस्य पाणिनीयस्य त्रिमुनिव्याकरणमिति कथने सार्थकता प्रकटिता वर्तते ।*)

**शब्दकुञ्जी :** व्याकरणम्, विभक्तिः, व्याकरणशास्त्रस्योत्पत्तिः, अष्टाध्यायी, शब्दपारायणम् ।

## विषयपरिचय

संसारे भाषायाः प्रवृत्तिःकथं जाता । इत्यस्मिन् विषये आधुनिकं भाषाविज्ञानं सर्वथा मौनं वर्तते । विषयेऽस्मिन् गतिस्तेषां नावलोक्यते । वयं तु कथयामो लोके भाषायाः प्रवृत्तिर्वेदाज्जातेति । अतः प्राचीनवाङ्मयानुसारेण संस्कृतभाषा वेदमूला विश्वस्यादिमा च मन्यते । उक्तञ्च–

अनादिनिधना नित्या वागुत्सृष्टा स्वयम्भुवा ।
आदौ वेदमयी दिव्या यतः सर्वाः प्रवृत्तयः ॥ इति । (मी.१)
सर्वेषां तु स नामानि कर्माणि च पृथक् पृथक् ।

वेदशब्देभ्य एवादौ पृथक् संस्थाच निर्ममे ॥ इति । (मनु.१।२१॥)

पद्याभ्यामाभ्यां वेदानामपौरुषेयत्वं नित्यत्वञ्च सिध्यति । वेदेषु निर्दिश्यमानानां शतशः शब्दानामर्था बहुविधा उपलभ्यन्ते पदान्तरसान्निध्यवशात्। शब्दानान्तेषामाधारेण लोके पदार्थानां संज्ञाः परिकल्पिताः। यथा पाणिनीयाष्टाध्याय्या रचना व्यावहारिकसंस्कृतभाषायाः प्रवृत्तेर्बहुकालपश्चाज्जाता (मीमांसक, प्र.भा., ४॥)। यद्यपि वेदे समस्तानां नाम्नां धातूनाञ्च समेषां प्रयोगो नावाप्यते । नोपलभ्यन्ते विभक्तिवचनेषु रूपाण्यपि तथापि क्वाचित्कानां निर्दिश्यमानानां प्रयोगाणामाधारेण मूलभूतशब्दानामन्वाख्यान-परिकल्पनपुरःसरं व्यवहारोपयोगिनां समस्तानां नाम्नामाख्यातपदानाञ्च सृष्टिर्विहिता वर्तते । क्वचिच्छब्दान्तरेषु प्रयुज्यमानानां विभक्तिवचनानामनुसारेण नाम्नां धातूनाञ्च तत् तद् विभक्तिवचनानां रूपनिर्धारणं विहितमवाप्यते । इत्थं भाषाया विषये महर्षिभिः प्रारम्भादेव भाषेयं वेदाधारा- बहुविस्तृता -सर्वव्यवहारोपयोगिनी च वर्तत इत्युपदिष्टा । भाषायास्तस्या व्याकरणशास्त्रस्योत्पत्तिविषये चर्चाऽत्र सन्निहिता वर्तते ।

## अध्ययनविधिः

अनुसन्धानात्मकस्यास्यालेखस्य सिद्धये विश्लेषणात्मकया पद्धत्या परम्परीण-वैज्ञानिकयोर्द्वयोरपि विध्योः पुस्तकालयस्य चोपयोगो विहितः। अत्र व्याकरणशास्त्रस्योत्पत्तिविषयः, व्याकरणानां सङ्ख्याया विषयः, व्याकरणस्य विकासक्रमविषयश्च प्रामाण्यग्रहमुपस्थापितः। निगमनात्मकविधेरनुसरणेनोपस्थितस्यास्यालेखस्य निष्कर्षे व्याकरण ग्रन्थानां वैविध्ये विद्यमानेपि पाणिनीयस्यैव व्याकरणस्योत्कर्षः कथं सिध्यतीति स्फुटं प्रतिपादितः ।

## सैद्धान्तिकाधारः

ऐतिहासिकदृशा परिपुष्टानां तथ्यानां सङ्कलनपुरःसरं प्रस्तुतेस्मिन्नालेखे व्याकरणशास्त्रस्योत्पत्तिः कथं जाता । तानि व्याकरणानि कतिसङ्ख्यायुतानि सन्ति । कतमद् व्याकरणं पूर्णमुत्कृष्टञ्चावलोक्यते । व्याकरणशास्त्रस्य विकासक्रमः कीदृशो वर्तते । समयसापेक्षत्वेनाध्ययनाध्यापनादि विषये सान्दर्भिको वर्तते वा नेति विषयाः स्फुटमत्र चर्चिताः सन्ति एतेन यथालब्धोपकरणैः सप्रामाण्यग्रहमुपस्थितेस्मिन्नालेखे सैद्धान्तिकस्याधारस्यावलम्बनं विहितमस्तीति पार्यते द्रष्टुम् ।

## संस्कृतभाषायाः प्राचीनत्वम्

प्राचीनवाङ्मयानुसारेण संस्कृतभाषा विश्वस्यादिमा भाषेति गम्यते । सर्वेषां ज्ञानानामादिमूलं वेद एवेत्यत्र समेषामप्यैतिहासिकाना-मैकमत्यम् । प्राचीनकालादेव भाषेयमति-विस्तृता वर्तते । अनेन लौकिकभाषाया विकासो वेदादाविर्भूत इति सिद्ध्यति । यतो हि स्वायम्भुवेन मनुनावेदशब्देभ्य एवादौ पृथक् संस्थाश्च निर्ममे इत्युक्तम् । सर्वज्ञानमयो हि सः (मनुस्मृतिः, २।७) इति च वेदस्य सर्वज्ञानमयत्वं साधयति । विवेचनेनाऽनेन व्याकरणशास्त्रस्यादिमूलमपि वेद एवेत्यवगम्यते । यतो हि वैदिकमन्त्रेषु पदानां व्युत्पत्तयो निर्दिश्यन्ते, व्युत्पत्तयस्ते अस्यैव सिद्धान्तस्य परिपोषकाः । यज्ञेन यज्ञमयजन्त यज्ञः कस्मात् ? प्रख्यातं यजति

कर्मेति नैरुक्ताः (निरुक्तम्, ३।१९), देवा : (ऋग्वेदः, १।१६४।५०), ये सहांसि सहसा सहन्ते, सहधातो 'असुन्' (दश. उ.९।४९), (पं.उ.४।१९०) इत्यसुन् (ऋ ६।६६।९)। पूर्वीरश्नन्तावश्विना, अश्विनौ यद् व्यश्नुवाते सर्वम् (निरुक्तम्, १२।१), (ऋग्वेदः, ८।५।३१), स्तोतृभ्यो मंहते मघम् (मघमिति धननामधेयम् ,मंहतेर्दानकर्मणः (निरुक्त १।७), (ऋग्वेदः, १।११।३), धान्यमसि धिनुहि, धिनोतेर्धान्यम् (महाभाष्यम्, ५।२।४) देवान् (यजुर्वेदः, १।२०) इत्यादयो मन्त्राः व्याकरणशास्त्रस्य प्राचीनत्वं साधयन्ति । व्याकरणाध्ययनप्रयोजनानि वर्णयता, मुनिना पतञ्जलिना चत्वारि श्रृङ्गा.....(ऋग्वेदः, ४।५८।३), चत्वारि वाक् (ऋग्वेदः, १।१६४।४५), उत त्वः (ऋग्वेदः, १०।७१।४), सक्तुमिव (ऋग्वेदः, १०।७१।२), सुदेवोऽसि (ऋग्वेदः, ८।६९।१२) इत्याकृतिकाः ये पञ्चसंख्यान्विता मन्त्रा निदर्शिताः । एतेऽपि मन्त्रा व्याकरणशास्त्रस्य वेदमूलकत्वं साधयन्ति (महाभाष्यम्, १।१।१) । मुनिना यास्केनापि चत्वारि वाक् (ऋग्वेदः, १६४।४५) इति मन्त्रस्यास्य व्याख्या व्याकरणदृशा विहितेति गम्यते । आचार्येणाऽनेन नामाख्याते चोपसर्गनिपाताश्चेति वैयाकरणा इत्यादिना विषयोऽयं स्फुटीकृतः (निरुक्तम्, १३।९) । अपि च व्याकरणमिति पदं येन धातुना निष्पद्यते तस्य मूलभूतेऽर्थे प्रयोगो यजुर्वेदे निर्दिश्यते (यजुर्वेदः, १९।७७) इति ।

## संस्कृतभाषायाः वेदाङ्गत्वम्

एवं हि वेदे निर्दिश्यमानानां शतशःशब्दानां निरुक्तिर्गमयति यद् एक एवापि शब्दः पदान्तरसान्निध्येन अर्थान्तराण्यभिव्यनक्तीति । अनेन नूनमपि एकस्यैव शब्दस्यार्था बहवो भवन्ति । तान् शब्दानाधृत्य लोके पदार्थानां संज्ञाः परिकल्पिताः । यतो हि सृष्टेरादौ बृहस्पतिरध्यापयितासीदिन्द्रश्चाध्येता दिव्यं वर्षसहस्रञ्चाध्ययनकालस्तत्र प्रतिपदं शब्दपारायणं विहितम् । बहूनामेव शब्दानामन्वाख्यानं जातम् तथापि बृहस्पतीन्द्रयोः शब्दपारायणप्रक्रिया नान्तञ्जगाम (चतुर्वेद, भूमिका, १) शब्दानामानन्त्यात् । अतः प्रतिपदं शब्दानामन्वाख्यानापेक्षया लघुनोपायेन शब्दानामन्वाख्यानार्थं भगवता पाणिनिना अष्टाध्यायीति संज्ञकं शब्दशास्त्रम् प्रणीतम् । प्रणीते शब्दशास्त्रेऽस्मिन् एकेनैव सूत्रमाध्यमेन बहवोपि शब्दाःसाधुतामापन्नाः । यथा इको यणचीति (पा.सू.६।१।७४॥) सूत्रेण बहवः शब्दाः निष्पादिताः । प्रकृति-प्रत्यययोरन्वाख्यानेन दुष्करोऽपि विषयः सुकरायितः । साम्प्रतिकानि चान्द्र-जैनेन्द्र-शाकटायन-हैम-सारस्वताभिधानि व्याकरणानि लौकिकशब्दान्वाख्यानपराणीति दृग्गोचरीभवन्ति । व्याकरणं पाणिनीयं तु लौकिक-वैदिकोभयविध शब्दव्युत्पादन-क्षममित्याख्यान्तीतिहासविदः । एतावता पाणिनीयस्यैव व्याकरणस्य मुख्यत्वं वेदाङ्गत्वञ्च सिध्यति ।

ऋक्तन्त्रव्याकरणे शाकटायनोऽपि- इदमक्षरच्छन्दो वर्णशः समनुक्रान्तं यथाऽऽचार्या ऊचुर्ब्रह्मा बृहस्पतये प्रोवाच, बृहस्पतिरिन्द्राय, इन्द्रो भरद्वाजाय, भरद्वाज ऋषिभ्यः, ऋषयो ब्राह्मणेभ्यस्तं खलु इममक्षरसमाम्नायम्,न भुक्त्वा न नक्तं प्रब्रूयाद् ब्रह्मराशिः इत्याचक्षते (मीमांसक, २०४१, ६२) अत्र ब्रह्मराशिरिति पदेन ब्रह्मप्रतिपादको वर्णराशिरिति गम्यते । अत एव भाष्यकृता वृत्तिसमवायार्थो

वर्णानामुपदेशः कर्तव्यः इत्युपात्तम् । एतावता सिद्धयति आदौ ऋषयो विस्तृतां भाषामुपदिष्टवन्तः । सैव व्यावहारिकी भाषा समजायत । वेदवाणीयम् दैवीं वाचमजनयन्त देवास्तां विश्वरूपा पशवो वदन्तिइति यां वाणीं देवाः प्रयुञ्जते सैव वाणी साधारणैर्जनैरपि प्रयुक्ता । मीमांसाप्रवक्त्रा महर्षिणा जैमिनिना प्रयोग-चोदना-भावादर्थैकत्व-मविभागात् इति सूत्रमाध्यमेन भाषाविषये स्वकीयमभिमतमुपस्थापितम् । सूत्रस्यास्य व्याख्यानक्रमे शबरस्वामिनाऽपि य एव लौकिकास्त एव वैदिकास्त एव च तेषामर्था (महाभाष्यम्, गिरिधर शर्मा चतुर्वेद, सन् १९५४, भूमिका, ३ ) इत्यादिना तस्यैवाऽभिमतस्य समर्थनं विहितमिति मीमांसकः प्रतिपादयति ।

मुनिना यास्केन व्याप्तिमत्वात्तु शब्दस्य अणीयस्त्वाच्च शब्देन संज्ञाकरणं व्यवहारार्थं लोके । तत्र मनुष्यवद् देवताभिधानम् । पुरुषविद्याऽनित्यत्वात् कर्मसम्पत्तिर्मन्त्रो वेदे अर्थवन्तः शब्दसामान्यात् वैदिकाः शब्दा अर्थवन्तो भवन्ति तेषां वैदिकानां शब्दानां लौकिकैः शब्दैः सह साम्यात् (मीमांसक, २०४१, १९९) इत्यादिना शब्दव्युत्पादनविषयकं स्वकीयमभिमतं ख्यापितम् । विवेचनेनाऽनेन शब्दशास्त्रस्य प्राचीनत्वं तन्निर्दिष्ट- नियमानामद्यावधिकत्वञ्च सिद्धयति ।

## व्याकरणशास्त्रस्योत्पत्तिः

व्याकरणशास्त्रस्योत्पत्ति-विषये समयनिर्धारणं दुष्करम् । रामायणे, गोपथब्राह्मणे (गो.ब्रा.प.१।२४) मुण्डकोपनिषदि (मुण्डको.१।५) महाभारतादिषु च ग्रन्थेषु

सर्वार्थानां व्याकरणाद् वैयाकरण उच्यते ।
तन्मूलतो व्याकरणं व्याकरोतीति तत् तथा ॥ (महाभारतम्, उद्योगपर्व,४२।६०)

इत्यवलोक्यते । गम्यते शब्दशास्त्रं व्याकरणमिति नामान्तरेणापि । वैदिकपदपाठस्य प्रकाशादग्रे व्याकरणं शब्दशास्त्रं सर्वथा पूर्णमित्यवाप्यते । तस्मिन् समये व्याकरणसम्बद्धः प्रकृति-प्रत्ययविभागो वैदिकवाङ्मय एवोपलभ्यतेस्म । तथा हि– वाजिनीऽवती (ऋग्वेदः, १।३।१०), आस्तृभिः (ऋग्वेदः, १।८।४),महिऽअत्वम् (ऋग्वेदः, १।८।५) इत्यादिषु मन्त्रेषूपलभ्यते। तथैव धातूपसर्गयोः सम्बन्धोऽपि वैदिकवाङ्मय एव चर्चितः । तदित्थं समऽअजग्मानः (ऋग्वेदः, १।६।७), प्रऽअतिरन्ते (ऋग्वेदः,१।११३।१६), प्रतिऽअहर्यते (ऋग्वेदः,८।४३।२) इत्यादिषु मन्त्रेषु विषयोऽयं स्फुटमभ्युपेयते । सामासिकः पूर्वोत्तर-पदविभाग-सन्दर्भोऽपि ऋग्वेद एव दृष्टिसाध्यः । तथा हि रुद्रवर्तनी इति रुद्र अवर्तनी (ऋग्वेदः, १।३।३), पतिऽलोकम् (ऋग्वेदः, १० ।८५।४३) इत्यादिषु मन्त्रेषूपलभ्यते । किञ्च रामायणेऽपि-

नूनं व्याकरणं कृत्स्नमनेन बहुधा श्रुतम् ।
बहु व्याहरताऽनेन न किञ्चिदपभाषितम् ॥ (रामायणम्, किष्किन्धाः ३।२९)

पद्यमेतन्निर्दिश्यते पद्यमेतदपि राज्ञोरामचन्द्रस्य काले व्याकरणशास्त्रस्याऽध्ययनमध्यापनं व्यवस्थित-मितीरयति । भारतयुद्धसमकालिके यास्कीयेऽपि निरुक्ते समधिकानां वैयाकरणानां नामानि निर्दिश्यन्ते । तथा हि– न सर्वाणीति गार्ग्यो वैयाकरणानां चैके इति (निरुक्तम्, १।१२)। अनुशाकटायनं वैयाकरणाः, उपशाकटायनं वैयाकरणा, इत्यादिना काशिकाकारेण समस्तपदानां साधुत्वं प्राचीनकालादेव प्रचलितमिति

निर्दिष्टम् (काशिका १।४।८६-८७) । नामशब्दानां धातुजत्वमिति प्रतिपादयितुराचार्यस्य शाकटायनस्य व्याकरणमपि यास्काऽऽचार्यात् प्रागेवोपस्थितिं साधयति । तथा हि तत्र नामाख्यातजानीति शाकटायनो नैरुक्तसमयश्च (निरुक्तम्, १।१२) इति । महाभाष्यकृतः पतञ्जलेरनुसारेणापि व्याकरणशास्त्र-सम्बद्धः पठन-पाठनादिको विषयो नितरां प्राचीनत्वेनाभ्युपगम्यते । तथा हि- पुराकल्प एतदासीत् संस्कारोत्तरकालं ब्राह्मणा व्याकरणं स्माधीयते । (महाभाष्यम्,अ.१,पा.१,आ.१॥) चर्चितानि प्रमाणान्येतानि व्याकरणाशास्त्रस्याति प्राचीनतां निर्वहन्ति ।

विदितचरो विषयोऽयं व्याकरणसाहाय्यमन्तरा व्यवहारातीता भाषा अशक्या प्रतिपत्तुमिति । अतो व्यवहारात् प्रच्युताया भाषायाः स्वरूसंघटने, भाषिकशिल्पार्जने च व्याकरणस्योत्कर्षता वरीवर्त्ति । यद्यपि भाषावगमे व्यवहारातिरिक्ता उपमानाप्तवाक्य-वाक्यशेषविवृति-सिद्धपदसान्निध्याख्याः शक्तिग्रहोपाया अपि निर्दिश्यन्ते ।परं लौकिकाय व्यवहाराय भाषाज्ञाने वा न ते पूर्णं साहाय्यमावहन्तीति भाषायाः स्वरूपसंघटनं तु व्याकरणमाध्यमेनैवोपलभ्यते । तानि च व्याकरणानि यद्यपि बहूनि सन्ति । यथा-

इन्द्रश्चन्द्रः-काशकृत्स्ना-पिशली शाकटायनः ।
पाणिन्यमर-जैनेन्द्रा जयन्त्यष्टादिशाब्दिकाः ॥ (मीमांसक, २०४१, ६९) इति ।

अपरमपि-

ऐन्द्रं चान्द्रं काशकृत्स्नं कौमारं शाकटायनम् ॥

सारस्वतं-चापिशलं शाकलं पाणिनीयकम् । (मीमांसक, २०४१, .७०) इति प्रसिद्धं पद्यमेतदपि उभे पद्ये साधयतः । एवं क्रमेण पाणिनीयाष्टाध्याय्यामाचार्यत्वेनोपस्थितिमायातानि पूर्वाचार्याणां नामान्यपि सूचयन्ति ।

## पूर्वाचार्याः

गच्छति काले पाणिनिना अष्टाध्यायीनामको ग्रन्थोऽवतारितः । यस्मिन् ग्रन्थे पूर्ववैयाकरणैराम्नाताः शब्दशास्त्रसम्बद्धविषया बहुधा निर्दिश्यन्ते । संसूचकेनाऽनेन तेषामाचार्याणां सत्ताविषयो निर्विवादपरः । शब्दशास्त्र-सम्बद्धोपकरण-विषयस्त्वाऽऽचार्याणान्तेषामग्रे विधास्यते । आचार्येण पाणिनिना सूत्राणां माध्यमेन शब्दशास्त्रे स्वोपनिबद्धे प्राग्वर्तिवैयाकरणानामष्टसंख्यकानां नामानि १) तृषिमृषिकृषेः काश्यपस्य (पा.सू.,१।२।२५), अवङ् स्फोटायनस्य (पा.सू.,६।१।११९), ई चाक्रवर्मणस्य (पा.सू., ६।१।१२६), अड् गार्ग्यगालवयोः (पा.सू.,७।३।९९), ऋतो भारद्वाजस्य (पा.सू.७।२।६३।), ओतो गार्ग्यस्य (पा.सू., ८।३।२०), गिरेश्च सेनकस्य (पा.सू., ५।४।११२) इति रीत्याऽनया निदर्शितानि ।

## सूत्रविमर्शः

सूत्राण्यपि तत्र ग्रन्थे 'औङ आपः' (पा.सू७।१।१८॥) 'आङि चापः' (पा.सू७।३।१०५॥) इत्याकाराण्यधीयन्ते। अत्र सूत्रे निदर्शितेन आङ् इत्यनेन तृतीयैकवचनं टा इत्यभ्युपेयते । औङ्इत्यनेन प्रथमाद्वितीययोर्द्विवचने औ–औङिति गृह्येते । आङ् इति संज्ञाया अतिप्रसिद्ध्या एषा संज्ञा पाणिनिना यथारूपमेव स्वीकारिता ।

आसां संज्ञानामर्थावबोधकं सूत्रान्तरं पाणिनीये शास्त्रे नावलोक्यते । विभक्तिनिर्देशसन्दर्भेऽपि 'स्वौजसमौडिति' (पा.सू. ४।१।२॥) सूत्रमधीय सु औ जस् इति प्रथमाविभक्तिरुच्यते । अम् औट् शस् इति द्वितीयाविभक्तिरुच्यते । टा भ्याम् भिस् इति तृतीया विभक्तिरुच्यते । क्रमेणानेन सप्तसंख्यकानां विभक्तीनां निर्देशोऽभ्युपेयते, परन्त्वेतेषां त्रिकाणां प्रथमाविभक्तिरिति संज्ञा भवति । एषां त्रिकाणां द्वितीयाविभक्तिरिति संज्ञा भवतीति रीत्या सप्तसंख्यकानां विभक्तीनां ज्ञापकानि सूत्रान्तराणि नावलोक्यन्ते । एवं 'तिप्तस्झिसिप्थस्थ'...( पा.सू३।४।७८॥) इत्याकारकं सूत्रमधीयते । तेषु तिप् तस् झि एते प्रथमपुरुषसंज्ञकाः भवन्ति । सिप् थस् थ एते मध्यमपुरुषसंज्ञकाःभवन्ति । मिप् वस् मस् एते उत्तमपुरुषसंज्ञकाः भवन्तीति अधीयते । परमेतेषां ज्ञापकं सूत्रान्तरं नावाप्यते । इत्थं प्रत्ययानां सन्दर्भेऽपि यथा 'तितुत्रतथसिसुसरकसेषु च' (पा.सू७।२।९॥) इति सूत्रमधीयते । अत्र निर्दिश्यमानाःकतिपयप्रत्ययाः पाणिनिना ग्रन्थे नाधीयन्ते । इड्निषेधश्चतेषां विधीयते । धातुपाठसन्दर्भेऽपि ऋत्धातुःस्तम्भुस्तुम्भुप्रभृतयो धातवः पाणिनीये धातुपाठे नावलोक्यन्ते परन्तु ते धातवः सूत्रेष्वधीयन्ते । यान् धातून् इमे सौत्रा धातव इति वदन्ति व्याख्यातारः । प्रमाणैरेभिः पाणिनेः प्राग्वर्तिवैयाकरणानां सत्ता व्याकरणसम्बद्धान्युपकरणानि तु स्फुटमवतरन्ति । परन्तु पूर्वाचार्यास्ते वैयाकरणा एवासन् उत ग्रन्थान्तरविवेचका इति व्याकरणसम्बद्धस्वतन्त्रग्रन्थानां तेषामनुपलब्धिवशात् दृढतरप्रमाणानामभावाच्च तेषां विषय इदमित्थमिति वक्तुमत्र न शक्यते । तथापि तत् तदाचार्याणामभिमतानि, सिद्धान्ताः, दृष्टिकोणानि पाणिनिना ग्रन्थे स्वके संगृहीतानीत्याचार्यप्रवृत्तिर्ज्ञापयति । अतस्तेषामाचार्याणां स्वतन्त्रव्याकरणग्रन्थप्रणेतृतायाम् अविद्यमानायामपि पाणिनिना तेषां पूर्वाचार्याणां सनामोल्लेखं सूत्राण्युपात्तानीति ते पूर्वाचार्याः नूनमपि महत्तामावहन्ति एतत्तु वक्तुमत्र शक्यते ।

## अष्टाध्यायी

आचार्येण पाणिनिना अष्टस्वध्यायेषु विभक्तः नाम्ना अष्टाध्यायीति ग्रन्थो विरचितः । तत्र प्रत्यध्यायं चत्वारः पादाः वर्तन्ते । प्रायस्तत्र ग्रन्थे प्रथमद्वितीयाध्यायाभ्यां वाक्येभ्यः पदानां सङ्कलनं विधीयते । तृतीयाध्यायादारभ्य आपञ्चमाध्यायान्तं पदेषु विधातव्यः प्रकृति-प्रत्ययविभागो दृष्टिपथमायाति । षष्ठाध्यायादारभ्य अष्टमाध्यायान्तं प्रकृतिप्रत्ययादिषु आगमादेशादीनां समायोजनेन परिनिष्ठितानां पदानां निष्पत्तिर्निर्दिश्यत इति क्रमेणाऽनेन पाणिनीयाष्टाध्यायी पूर्णतामुपैति । तत्र अष्टसु अध्यायेषु अध्यायप्रथमः परिभाषाः कतिपया समादाय संज्ञापरकत्वेनाऽवतरति । तत्राऽपि 'वृद्धिरादैच्' (पा.सू१।१।१॥) इति सूत्रत आरभ्य 'नाज्झलौ' (पा.सू १।१।१०॥) सूत्रावधि वर्णसम्बद्धाः संज्ञा निर्दिश्यन्ते । 'ईदूदेद् द्विवचनं प्रगृह्यम्' (पा.सू१।१।११॥) इति सूत्रत आरभ्य वर्णसमूहात्मिकाः संज्ञाः सन्निहिता वर्तन्ते । 'नवेति विभाषा' (पा.सू१।१।४३॥) इत्याकार कसूत्रस्योपस्थित्या विभाषासंज्ञया, 'इग्यणः सम्प्रसारणम्' (पा.सू१।१।४४॥) इत्याकारकसूत्रस्योपस्थित्या च सम्प्रसारणसंज्ञया तत्र आर्थी संज्ञा ज्ञाप्यते । क्रमेणाऽनेन पाणिनीयाष्टाध्याय्याः संज्ञासम्बद्धः कार्यपक्षः पूर्ण इति मन्यते । 'इग्यणः सम्प्रसारण'मिति सूत्रतोऽग्रे परिभाषाप्रकरणस्यारम्भो विधीयते । क्रमेऽस्मिन् 'अदर्शनं लोपः' (पा.सू१।१।५९॥) सूत्रस्योपस्थापनेन अर्थसम्बद्धा लोपसंज्ञा निदर्श्यते । औचित्यानुसारेण

'अचोऽन्त्यादि टि' (पा.सू १।१।६३॥) सूत्रस्योपस्थित्या टिसंज्ञाया उपस्थितिरवतार्यते। 'अलोऽन्त्यात् पूर्व उपधा' (पा.सू१।१।६४॥) सूत्रस्योपस्थित्या उपधा संज्ञाया विज्ञापनं विधीयते । पादान्ते वृद्धसंज्ञा दृग्गोचरीभवति । एतन्निदर्शनमेव अत्रोपस्थापितम् अष्टाध्यायीग्रन्थस्येति विज्ञेयम् । एतेन विचक्षणा जानन्त्येव तेष्वष्टविधेषु नवविधेषु वा व्याकरणेषु पाणिनीयमेव व्याकरणं साङ्गं सर्वाङ्गसम्बद्धमिति ।

**विकासक्रमः**

गीर्वाणवाणीयमादावति विस्तृतासीद् । साम्प्रतिकाः छान्दसाःशब्दास्तस्मिन् समये जनसाधारणैः प्रयुज्यन्तेस्म । पाणिनीयेषु सूत्रेष्वपि छान्दसा इति स्वीकृताः बहुत्र भगवता पतञ्जलिना । मुनिना यास्केनापि लौकिकानां शब्दानां मूलप्रकृतिः = धातुनां क्वचिद् वेदे एवोपलभ्यते । अनेके च वैदिकशब्दाः विशुद्धेभ्यो लौकिकधातुभ्यो निष्पद्यन्ते (द्र.अथापि भाषिकेभ्यो धातुभ्यो नैगमाः कृतो भाष्यन्ते । दमूनाः क्षेत्रसाधा इति । अथापि नैगमेभ्यो भाषिकाः उष्णम्, घृतमिति । २।२॥ घरतिरस्मा अविशेषणोपदिष्टः । स घृतं घृणा घर्म इत्येवं विषयः । महाभाष्य ७१।९६॥, मीमांसक,प्र.भा., २५,टी.१) इत्युक्तम् । सम्मिश्रणेनानेन लौकिकानां शब्दानां मूलप्रकृतेः प्रयोगः केवलं वेदे प्राप्यते ।तेषां प्रयोगः भाषायां कदाचिज्जातः स्यात्, अन्यथा वैदिकेभ्यो धातुभ्यो निष्पन्नानां शब्दानां प्रयोगो लोके कथं भवेत् लौकिकेभ्यश्च धातुभ्यो वैदिकानां शब्दानां निष्पत्तिः कथं भवेत् ? यदि वैदिकानां शब्दानां लोके प्रयोगो नाभिमन्येत तर्हि अपभ्रंशशब्दानामुत्पत्तिर्न जायेत । यतो हि अपभ्रंशशब्दानामुत्पत्तौ अयथार्थोच्चारणमपि कारणं भवति । (द्र.पारम्पर्यादपभ्रंशो विगुणेष्वभिधातृषु । वाक्यपदीय १।१५४॥) एतेन अपभ्रंशशब्दानामुदयो यस्मिन् समये संस्कृतभाषायां सम्प्रतिं वैदिका इति कथ्यमानाः शब्दाः सामान्ये व्यवहारेपि प्रयुज्यन्तेस्म तदा प्रभृति जातः । तस्मिन् समये भाषयमतिविशालासीत् ।

गच्छति काले कालक्रमेण जनेषु बुद्धिमान्द्यं भजत्सु सर्वत्र संकोचो जातःशास्त्रेष्वपि । पाणिनीमपि शब्दशास्त्रमेतद् दुर्धर्षं दुरवगाहञ्चाजायत । शब्दशास्त्रस्यास्य सारल्याय विद्वद्भिरवतारितानि तत्राष्टाध्याय्यां काशिका-रूपावतार-प्रक्रियाकौमुदी-सिद्धान्तकौमुदीप्रभृतीनि विविधानि व्याख्यानानि व्याख्यानान्तराणि च । क्रमेणानेन पाणिनीय-व्याकरणस्याध्ययना-ध्यापन-परम्परा सूत्रपाठ-माध्यमेन प्रक्रियाक्रमेण चेति द्विधाऽजायत। अत्र पाणिनीयाष्टाध्यायीमाधृत्य प्रक्रियाग्रन्थकृतां नामान्येवोपस्थाप्यन्ते। तथा हि-धर्मकीत्ति-विमलसरस्वती-रामचन्द्र-शेषकृष्ण-विट्ठल-चक्रपाणिदत्त-अप्पननैनार्य-वारणवनेश-विश्व-कर्मशास्त्रि-नृसिंह-निर्मलदर्पणकारजयन्ताः ।

**निष्कर्षः**

प्राचीनवाङ्मयानुसारेण संस्कृतभाषा वेदमूला विश्वस्यादिमा च मन्यते । भाषाया अस्या विकासक्रमो विश्वस्मिन् सृतोवलोक्यते । येन प्रकारेण कमपि शब्दमजानानः शिशुः व्यवहारं विहाय नान्यैरुपायैः शक्यो बोधयितुं तथैव परिष्कृताया भाषाया अभावे पौरस्त्यानि शब्दशास्त्राण्युच्छिद्येरन्निति

साधुशब्दानामन्वाख्यानाय व्याकरणशास्त्रस्योत्पत्तिर्विकासश्चावश्यकः । शब्दानामानन्त्यभिया प्रतिपदं शब्दानामन्वाख्यानापेक्षया लघुनोपायेन शब्दानामन्वाख्यानार्थं भगवता पाणिनिना अष्टाध्यायीति ग्रन्थो विरचितः । तदग्रे यद्यपि व्याकरणानि वैयाकरणाश्चासन् । तथापि शब्दान्वाख्यानपराणि परिनिष्ठितानि पूर्णानि साङ्गानि व्याकरणानि न दृश्यन्ते ऋते पाणिनीयव्याकरणात् । त्रिमुनिषु यथोत्तरं मुनीनां प्रामाण्यमिति वचनस्याधारेण भगवतः पतञ्जलेर्प्रामाण्यग्रहात् पाणिनीये व्याकरणे भगवतः पतञ्जलेर्बहुशो वचनानामभ्युपेयत्वात् पाणिनीयव्याकरणमुपजीव्य व्याकरणान्तराणाञ्च निर्दिश्यमानत्वादपि प्रामाण्यग्रहः पाणिनीयस्यैव व्याकरणस्येति व्याकरणशास्त्रस्योत्पत्तिर्विकासोपि पाणिनीयमेव व्याकरणमनुयातीति वक्तुं शक्यम् ।


## कृतज्ञताज्ञापनम्

प्रस्तुतेऽस्मिन्नालेखे परामर्शदातृभ्यः सर्वेभ्यो हार्दान् धन्यवादानभिव्यनज्मि ।


## सन्दर्भसामग्रीसूची


आचार्यः, पाणिनिः (सन् १९७७). *अष्टाध्यायीसूत्रपाठ* (व्याख्याता श्रीनारायण मिश्रः), वाराणसी : चौखम्बा ओरियण्टालिया ।

आचार्यः, हरिप्रसादः (२०६०). *अष्टाध्यायी* (शारदाप्रभाव्याख्यामहिता) दाङ : महेन्द्रसंस्कृतविश्वविद्यालयः ।

पतञ्जलिः, (सन् १९५४). *व्याकरणमहाभाष्यम्* (सम्पा. रुद्रधरशर्मा), वाराणसी : चौखम्बासंस्कृतसंस्थानम् ।

मनुः, मनुस्मृतिः (सन् २०१३). (व्याख्याता. शिवराजाचार्यः कौडिन्न्यायनः), वाराणसी : चौखम्बाविद्याभवनम् ।

मीमांसकः, युधिष्ठिरः (२०४१). *संस्कृत व्याकरण शास्त्र का इतिहास* 'प्रथमभागः', हरियाणा : रामलाल कपूर ट्रष्ट ।

मीमांसकः, युधिष्ठिरः (२०४१). *संस्कृत व्याकरण शास्त्र का इतिहास* 'द्वितीयभाग', हरियाणा : रामलाल कपूर ट्रष्ट ।

मीमांसकः, युधिष्ठिरः (२०३०). *संस्कृत व्याकरण शास्त्र का इतिहास* 'तृतीय भाग', हरियाणा : रामलाल कपूर ट्रष्ट ।

वामन-जयादित्यौ, (सन् १९६७). *काशिकावृत्तिः* (षष्ठः भागः) (सम्पा. द्वारिकादासादि) वाराणसी : तारापब्लिकेशन्स ।